# 4. कोणार्कः



(एकस्मिन् विद्यालये आचार्य-छात्राणां मध्ये शैक्षिक-भ्रमण-विषये संवादः प्रचलति।)

आचार्यः - प्रिय-छात्राः! सुप्रभातम्।

छात्राः - सुप्रभातम् आर्य! नमोऽस्तु।

आचार्यः - नमोऽस्तु। युष्माभिः शैक्षिक-भ्रमणं कृतम्?

छात्राः - आम् आर्य!

आचार्यः - किं यूयं सर्वे प्रसन्नाः?

छात्राः – आम्, वयं सर्वे प्रसन्नाः एव।

आचार्यः – अतिशोभनम्। यूयं कुत्र अगच्छत?

सुशीलः – आर्य, वयं कोणार्कमन्दिरम् अगच्छाम।

आचार्यः – साधु। सुनीते, जानासि, कोणार्कः कुत्र अस्ति?

सुनीता – जानामि आर्य, कोणार्कः ओरिसाप्रदेशे अस्ति।

आचार्यः – गोविन्द, त्वं कथय, किमर्थम् इदं मन्दिरं कोणार्कः इति कथ्यते?

गोविन्दः – जानामि आर्य! अर्कस्य अर्थात् सूर्यस्य कोणः एतद् मन्दिरं प्रथमं स्पृशति। अतः अस्य नाम कोणार्कः ।

आचार्यः – समीचीनम्। मेधे, त्वं वद, कोणार्कमन्दिरस्य आकारः कीदृशः?

मेधा – कोणार्कमन्दिरं रथरूपम् अस्ति। तस्य द्वादश चक्राणि सन्ति।

आचार्यः – शोभनम्। प्रिय-छात्राः! कोणार्कः भारतस्य प्रसिद्धं पर्यटनस्थानम् अस्ति। सुरेश! ओरिसाप्रदेशस्य अन्येषां पर्यटनस्थानानां नामानि यदि जानासि तर्हि कथय।

सुरेशः – अहं कथयामि आर्य! तत्र प्रसिद्धम् पुरीस्थम् जगन्नाथमन्दिरम् अपि अस्ति।

आचार्यः – शोभनम्। वयं सर्वे तत्र गत्वा कोणार्कमन्दिरस्य ओरिसाप्रदेशस्य च शोभां पुनः द्रक्ष्यामः ।

# अनुशीलनम्

**1. आम्/न इति लिखत।**

1. किं कोणार्कः ओरिसाप्रदेशे अस्ति? ..................
2. किं कोणार्कः प्रसिद्धं मन्दिरम् अस्ति? ..................
3. किम् अर्कः चन्द्रस्य पर्यायः? ..................
4. किं कोणार्करथे त्रीणि चक्राणि सन्ति? ..................
5. किं पुरीस्थं जगन्नाथमन्दिरम् ओरिसाप्रदेशस्य प्रसिद्धं पर्यटनस्थानम् अस्ति? ..................

**2. अधोलिखितानां प्रश्नानाम् उत्तराणि एकेन पदेन लिखत।**

1. कोणार्कः कुत्र अस्ति? ..................
2. सर्वे छात्राः कुत्र अगच्छन्? ..................
3. कोणार्करथस्य द्वादश कानि सन्ति? ..................
4. कोणार्कः कस्य प्रदेशस्य प्रसिद्धपर्यटन-स्थानम्? ..................

**3. अधोलिखितानां प्रश्नानाम् उत्तराणि एकेन वाक्येन लिखत।**

1. छात्राः कुत्र अगच्छन्?

.........................................................................

2. कोणार्कः कुत्र अस्ति?

..........................................................................

3. कोणार्कमन्दिरस्य आकारः कीदृशः अस्ति?

..........................................................................

4. ओरिसाप्रदेशस्य केषाञ्चन पर्यटन-स्थानानां नामानि लिखत।

..........................................................................

**4. निम्नलिखितेषु पदेषु समुचितं पर्यायपदं पाठात् चित्वा लिखत।**

साधु –

सौन्दर्यम् –

सूर्यः –

विख्यातः –

देवालयः –

**5. विलोममेलनं कुरुत।**

| | |
|---|---|
| प्रसिद्धः | न |
| प्रियः | अप्रसिद्धः |
| विशेषः | अनवगतम् |
| आम् | अप्रियः |
| अवगतम् | अविशेषः |